# दत्त स्तवं

श्री गणेशाय नमः
श्री सरस्वत्यै नमः
श्रीपादवल्लभ नरसिंह सरस्वति श्री गुरु दत्तात्रेयाय नमः

1. दत्तात्रेयं महात्मानं वरदं भक्त वत्सलं
प्रपन्नार्ति हरं वंदे स्मर्तृगामी सनोवतु

2. दीनबंधुं कृपासिंधुं सर्व कारण कारणं
सर्व रक्षाकरं वंदे स्मर्तृगामी सनोवतु

3. शरणागत दीनार्त परित्राण परायणं
नारायणं विभुं वंदे स्मर्तृगामी सनोवतु

4. सर्वानर्थ हरं देवं सर्व मंगळ मंगळं
सर्व क्लेश हरं वंदे स्मर्तृगामी सनोवतु

5. ब्रह्मण्यं धर्म तत्त्वज्ञं भक्त कीर्ति विवर्धनं
भक्ताभीष्ट प्रदं वंदे स्मर्तृगामी सनोवतु

6. शोषणं पाप पंकस्य दीपनं ज्ञान तेजसः
ताप प्रशमनं वंदे स्मर्तृगामी सनोवतु

7. सर्व रोग प्रशमनं सर्व पीडा निवारणं
विपदुद्धरणं वंदे स्मर्तृगामी सनोवतु

8. जन्म संसार बंधघ्नं स्वरूपानंद दायकं
निश्श्रेयस पदं वंदे स्मर्तृगामी सनोवतु

9. जय लाभ यशः काम दातुर्दत्तस्य यस्तवं
भोग मोक्ष प्रदस्येमं प्रपठेत सकृती भवेत

श्री गणेशाय नमः
श्री सरस्वत्यै नमः
श्रीपादवल्लभ नरसिंह सरस्वति श्री गुरु दत्तात्रेयाय नमः